


# National Education Day
# राष्ट्रियशिक्षादिवसः

## दिनाङ्कः - ११.११.२०१९

विद्यापीठस्य शिक्षणविभागेन राष्ट्रियशिक्षादिवसमभिलक्ष्य ११.११.२०१९ दिनाङ्के प्रथमकेन्द्रीयशिक्षामन्त्रिणः भारतरत्नस्य श्रीमतः मौलानाअबुल्कलाम आजादमहोदयस्य एकनवत्युत्तरैकशततमजयन्त्युत्सवं (१९१) पुरस्कृत्य कार्यक्रमः समायोज्यत । कार्यक्रमस्याध्यक्ष्यं विद्यापीठस्य मान्याः **कुलपतयः आचार्याः वि. मुरलीधरशर्ममहोदयाः** व्यभूषयन् । मुख्यातिथिपदं श्रीवेङ्कटेश्वरविश्वविद्यालयस्य **आचार्यचराः प्रो. एम्. भास्करमहोदयाः** अलमकार्षुः । सम्मान्यातिथिपदं शैक्षिकसंकायप्रमुखाः **आचार्याः राणिसदाशिवमूर्तिमहोदयाः** समलन् । मान्यानां करकमलाभ्यां दीपप्रज्वलनेन संगीतविभास्य सहाचार्याणां व्याजर्सुसुब्रह्मण्यमहोदयानां संगीतमयप्रार्थनया च सहकार्यक्रमस्योद्घाटनं समभूत् । शिक्षणविभागप्रमुखाः आचार्याः एन्. लतामहोदयाः कार्यक्रमस्य प्रास्ताविकमकथयन् । सारस्वतभाषणं कुर्वन्तः मुख्यातिथयः जीवनस्याधारभूतायाः शिक्षायाः मूल्यानि वर्तमानप्रसङ्गेशिक्षाया महत्त्वं च प्रत्यपीपदन् । अध्यक्षभाषणं विदधानाः मान्याः कुलपतयः संस्कृतभाषायाः कौशलानि शिक्षाया अभिवृद्धिं च न्यरूपयन् । शिक्षाशास्त्रविभागस्य सहाचार्या एस्. वैष्णवीमहोदया कृतज्ञताज्ञापनमाविरकरोत् । शिक्षाविभागस्य सहाचार्यः डा. एम्. दत्तात्रयशर्ममहोदयः सम्पूर्णकार्यक्रमं समचालयत् ।

